# Vakratunda Stuti Shivakrita

# શિવકૃતા વક્રતુણ્ડસ્તુતિઃ

## Document Information

Text title : Vakratunda Stuti Shivakrita

File name : vakratuNDastutiHshivakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM prathamaH khaNDaH | adhyAyaH 51 | 1.51 21-32||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

June 5, 2024

*sanskritdocuments.org*

# શિવકૃતા વક્રતુણ્ડસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
શિવ ઉવાચ ।
નમસ્તે વક્રતુણ્ડાય સર્વસિદ્ધિપ્રદાય ચ ।
નિરાકારાય દેવાય સાકારાય નમો નમઃ ॥ ૨૧॥
નમઃ સર્વપ્રબોધાય નમઃ સર્વપ્રિયઙ્કર ।
ગણાનાં પતયે તુભ્યં ગણેશાય નમો નમઃ ॥ ૨૨॥
બ્રહ્મણે સૃષ્ટિકર્ત્રે તે પાલકાય ચ વિષ્ણવે ।
સંહર્ત્રે તે હરાયૈવ ગુણેશાય નમો નમઃ ॥ ૨૩॥
બ્રહ્માકારાય વૈ તુભ્યં બ્રહ્મભૂતાય તે નમઃ ।
નમઃ પ્રપઞ્ચરૂપાય પ્રપઞ્ચાનાં પ્રચાલક ॥ ૨૪॥
અનન્તગુણધારાય હ્યનન્તવિભવાય તે ।
અનન્તોદરરૂપાય હેરમ્બાય નમો નમઃ ॥ ૨૫॥
કારણાનાં પરાયૈવ કારણાય નમો નમઃ ।
અકારણાય વૈ તુભ્યં સિંહવાહાય તે નમઃ ॥ ૨૬॥
અહં જીવસમાનશ્ચ સઞ્જાતો નાત્ર સંશયઃ ।
અવિમુક્તં વિમુક્તં મે જાતં દેવ દયાનિધે ॥ ૨૭॥
અતસ્ત્વાં શરણં યાતો નિર્વિઘ્નં કુરુ માં પ્રભો ।
દેહિ કાશીં ગણાધ્યક્ષ અવિમુક્તતયા ચ મે ॥ ૨૮॥
ત્વયા પુરા વરો દત્તઃ સ્મરણેન ત્વદગ્રતઃ ।
સ્થાસ્યામિ પુત્રભાવેન તં પાલય ગજાનન ॥ ૨૯॥
ઇત્યુક્ત્વા પાદયોસ્તસ્ય પ્રણનામ મહેશ્વરઃ ।
તમુત્થાપ્ય ગણાધ્યક્ષ ઉવાચ પ્રહસન્નિવ ॥ ૩૦॥
(ફલશ્રુતિઃ)
વક્રતુણ્ડ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં ભવેત્ ।

પઠતે શ઼ૃણ્વતે ચૈવ ભુક્તિમુક્તિપ્રદં શિવ ॥ ૩૧॥
અન્યદ્યત્પ્રાર્થિતં સર્વં કરિષ્યામિ સદાશિવ ।
અવિમુક્તં પ્રદાસ્યામિ સાર્થકં તે ચ સામ્પ્રતમ્ ॥ ૩૨॥

ઇતિ શિવકૃતા વક્રતુણ્ડસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પ્રથમઃ ખણ્ડઃ । અધ્યાયઃ ૫૧ । ૧.૫૧ ૨૧-૩૨॥

- .. mudgalapurANaM prathamaH khaNDaH . adhyAyaH 51 . 1.51 21-32..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Vakratunda Stuti Shivakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*